# Adhikarana Ratnamala

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ।।

श्रीशेषशैलशृङ्गे तुङ्गे निगमोत्तमाङ्गे च ।

उत्सङ्गे च फणीन्द्रस्योज्ज्वलमेकं भजे तेजः ।। 1 ।।

विरचितकर्मविचारैः मुमुक्षुभिः तत्फलेषु वैराग्यात् ।

यज्जिज्ञास्यं पुरुषैः तद्ब्रह्म श्रीनिवासनाम भजे ।। 2 ।।

उत्पत्तिस्थितिविलयैर्भुवनस्यैतस्य यत्कार्यैः ।

यत्प्राप्तुं शक्यं तद्ब्रह्म श्रीनिवासनाम भजे ।।3।।

जगदेककारणं यत् सर्वज्ञत्वादिगुणगणाभरणम् ।

शास्त्रैकसमधिगम्यं तद्ब्रह्म श्रीनिवासनाम भजे।।4।।

निखिलनिगमान्तवाक्यैः पुरुषार्थतयाऽभिधीयमानत्वात् ।

यद्भवति शास्त्रवेद्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 5 ।।

ईक्षादिशेषवचनात् सच्छब्दितकारणस्य सद्विद्या ।

यदिति व्यनक्ति यत् सत् तद्ब्रह्म श्रीनिवासनाम भजे ।। 6।।

निरुपधिकानन्दाद्यैरानन्दमयं व्यनक्ति तद्विद्या ।

इतरव्यावृत्तैर्यत्तद्ब्रह्म श्रीनिवासनाम भजे ।। 7 ।।

आदित्यमण्डलान्तर्वर्तिनमुपदिश्य पुण्डरीकाक्षम् ।

विद्या व्यनक्ति तं यत्तद्ब्रह्म श्रीनिवासनाम भजे ।। 8 ।।

आकाशस्य वदन्ति यदेकयोग्यान् परायणत्वादीन् ।

तं गमयति श्रुतिर्यत्तब्रह्म श्रीनिवासनाम भजे ।।9।।

प्राणस्य कारणत्वं श्रुतिब्रुवाणा प्रसिद्धिनिर्देशात् ।

यदिति व्यनक्ति तमिमं तद्ब्रह्म श्रीनिवासनाम भजे ।। 10 ।।

निरतिशयदीप्तियुक्तं ज्योतिः पादोऽस्य भूतानि ।

इत्युक्त्या यद्भवति तद्ब्रह्म श्रीनिवासनाम भजे ।।11 ।।

इन्द्रप्राणपदोक्तं यदिति व्यक्तीकरोति यद्धर्मैः ।

विद्या प्रतर्दनाङ्का तद्ब्रह्म श्रीनिवासनाम भजे ।। 12 ।।

सर्वं ब्रह्म यदुक्तं तत्तज्जत्वाद्यनूक्तिसामर्थ्यात् ।

यदिति व्यनक्ति विद्या तद्ब्रह्म श्रीनिवासनाम भजे ।। 13 ।।

अत्तारमोदनोक्त्या सिद्धं मृत्यूपसेचनत्वोक्त्या ।

संहर्तृ यदिति गमयति तद्ब्रह्म श्रीनिवासनाम भजे ।। 14 ।।

अक्षिपुरुषं प्रसिद्धैश्चक्षुः स्थित्यादिभिर्धर्मैः ।

यदिति व्यनक्ति विद्या तद्ब्रह्म श्रीनिवासनाम भजे ।। 15 ।।

अन्तर्यामितयोक्तं युगपत्सर्वस्य नियमनप्रमुखैः ।

यदिति व्यनक्ति विद्या तद्ब्रह्म श्रीनिवासनाम भजे ।। 16 ।।

यद्भूतयोनिरक्षरमुक्तं यज्ज्ञापकैर्धर्मैः ।

विद्या स्फुटयति तद्यत् तद्ब्रह्म श्रीनिवासनाम भजे ।।17 ।।

वैश्वानरात्मविद्या द्युप्रभृतीनां तदङ्गताकथनात् ।

यदिति व्यनक्ति तमिमं तद्ब्रह्म श्रीनिवासनाम भजे ।।18 ।।

द्युपृथिव्याद्याधारं कथयन्त्यमृतस्य सेतुमात्मानम् ।

यदिति व्यनक्ति विद्या तद्ब्रह्म श्रीनिवासनाम भजे ।।19 ।।

प्राणपदोक्ताज्जीवादर्थान्तरमवगमय्य भूमानम् ।

यदिति व्यनक्ति विद्या तद्ब्रह्म श्रीनिवासनाम भजे ।।20 ।।

अक्षरमस्थूलमनण्वित्याद्युक्तं प्रशासितृत्वाद्यैः ।

यदिति व्यनक्ति विद्या तद्ब्रह्म श्रीनिवासनाम भजे ।।21 ।।

मुक्तेक्ष्यमाणपुरुषं श्लोकोक्त्या सूरिदृश्यमानतया ।

यदिति व्यनक्ति विद्या तद्ब्रह्म श्रीनिवासनाम भजे ।। 22 ।।

अपहतपाप्मत्वाद्यैर्यद्धर्मैर्यदिति दहरमाकाशम् ।

विवृणोति दहरविद्या तद्ब्रह्म श्रीनिवासनाम भजे ।।23 ।।

अङ्गुष्ठमात्रपुरुषं मनुष्यहृदयस्थमीशितृत्वाद्यैः ।

यदिति व्यनक्ति विद्या तद्ब्रह्म श्रीनिवासनाम भजे ।।24 ।।

दुःखत्रयाभिभूतैरात्यन्तिकतन्निवृत्तिकामनया ।

देवैरपि यदुपास्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 25 ।।

वसुरुद्रादिपदस्थैर्भूयस्तत्प्राप्तिकामनावद्भिः ।

स्वावस्थं यदुपास्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 26 ।।

शुश्रूषुं प्रति गुरुणा शूद्रेत्यामन्त्रणस्य दृष्टस्य ।

शोचननिमित्तकतया शूद्रेष्वधिकारगमकताविरहात् ।। 27 ।।

।शूद्रस्यापि मुमुक्षोर्वेदाध्ययनादिरहिततया ।

नाधिकृतिर्यदुपास्तौ तद्ब्रह्म श्रीनिवासनाम भजे ।। 28 ।।

आकाशस्य वदन्ती श्रुतिरन्या नामरूपकर्तृत्वम् ।

यदिति व्यनक्ति तमिमं तद्ब्रह्म श्रीनिवासनाम भजे ।। 29 ।।

योगिवशीकरणीयेष्विन्द्रियपूर्वेषु यस्य मुख्यत्वम् ।

अभिधत्ते कठवल्ली तद्ब्रह्म श्रीनिवासनाम भजे ।। 30 ।।

यत्कार्यत्वं प्रकृतेः प्रजाः सृजन्त्या अजाश्रुतिब्रूरूते ।

शखान्तरैककण्ठ्यात् तद्ब्रह्म श्रीनिवासनाम भजे ।। 31 ।।

पञ्चजनशब्दितानामाकाशस्येन्द्रियाणां च ।

यदधीना स्थितिरुक्ता तद्ब्रह्म श्रीनिवासनाम भजे ।। 32 ।।

सर्वज्ञत्वादिपुरुषं यदेव वियदादिकारणत्वेन ।

श्रुतयो वदन्ति सर्वाः तद्ब्रह्म श्रीनिवासनाम भजे ।। 33 ।।

यस्यैतत्कर्मेति श्रुतिरक्षादिप्रमाणसिद्धस्य ।

ब्रूते यत्कार्यत्वं तद्ब्रह्म श्रीनिवासनाम भजे ।। 34 ।।

द्रष्टव्य इति य उक्तस्तस्यामृतहेतुताद्युक्त्या ।

स यदिति गमयति विद्या तद्ब्रह्म श्रीनिवासनाम भजे ।। 35 ।।

यस्यैकस्य ज्ञानात् ज्ञातमिदं भवति सर्वमित्युक्त्या ।

गमयति यदुपादानं तद्ब्रह्म श्रीनिवासनाम भजे ।। 36 ।।

तैस्तैः शिवादिशब्दैरभिहितमपि वस्तु यद्धर्मैः ।

गमयन्ति यदिति विद्याः तद्ब्रह्म श्रीनिवासनाम भजे ।। 37 ।।

मन्वाद्याप्तबहुस्मृत्युपबृंहितवेदमौलिसिद्धतया ।

यद्धेतुत्वमचाल्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 38 ।।

।द्रव्यैक्यमेव नियतं प्रकृतिविकृत्योर्न साजात्यम् ।

चिदचिच्छरीरकस्य ब्रह्मण एवात्र हेतुकार्यत्वात् ।। 39 ।।

अन्तर्यामिब्राह्मणसिद्धत्वाद्देहदेहिभावस्य ।

अपृथक्सिद्धे जगति ब्रह्म प्रति देहलक्ष्मसत्वाच्च ।। 40 ।।

देहगतावस्थानां देहिन्यात्मन्यनन्वयाच्चापि ।

यद्धेतुत्वमचाल्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 41 ।।

कणभक्षादिमतानामन्योन्यं व्याहतत्वेन ।

यद्धेतुत्वमचाल्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 42 ।।

कर्मकृतभोक्तृतया अकर्मवश्ये प्रसक्त्यभावेन ।

यद्धेतुत्वमचाल्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 43 ।।

श्रुतिभिरुपपादितत्वात् प्रकृतिविकृत्योरभेदस्य ।

यद्धेतुत्वमचाल्यं तद्ब्रह्म श्रीनिवासनाम भजे ।।44।।

तत्वमसीत्यादीनामन्यपरत्वाज्जगत्स्रष्टुः ।

सृज्यस्य च जीवस्य स्वरूपभेदस्य दुष्प्रकम्पतया ।। 45 ।।

जीवाहितकरणेऽपि स्वाहितकरणसङ्गविरहेण ।

यद्धेतुत्वमचाल्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 46।।

असहकृतक्षीरादेर्दध्यादयारंभदर्शनाल्लोके ।

सहकारिनियमविरहात् शक्तिमतां तेषु तेषु कार्येषु ।।47।।

सहकारमन्तरैवं जगदारंभस्य संभवात् प्रकृते ।

यद्धेतुत्वमचाल्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 48 ।।

धर्मिग्राहकमानात् यद्वस्तु यथैव सिद्ध्यति तथैव ।

तत्स्वीकार्यं सर्वैः ब्रह्मैकं निष्कलं च बहु भवति ।। 49 ।।

।इत्यागमसिद्धेऽर्थे लौकिकचोद्यस्य निरवकाशत्वात् ।

यद्धेतुत्वमचाल्यं तद्ब्रह्म श्रीनिवासनाम भजे ।।50 ।।

लीलाप्रवृत्तसृष्टावसंभवान्निष्प्रयोजनत्वस्य ।

यद्धेतुत्वमचाल्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 51 ।।

प्राज्ञानधिष्ठितानां दार्वादीनां अचेतनानां न ।

दृष्टः कार्यारंभः तस्मादचितः प्रधानस्य ।। 52 ।।

।कार्यारंभकतायाः साङ्ख्योक्ताया असंभवाछ्रौतम् ।

यद्धेतुत्वं सुदृढं तद्ब्रह्म श्रीनिवासनाम भजे ।। 53 ।।

परमाणवो निरंशा यदि योगासंभवात् तेषाम् ।

द्व्यणुकारंभो न स्यात् यदि सांशास्तेऽपि तद्वत् स्युः ।। 54 ।।

इत्यनवस्थेत्याद्यैः वैशेषिकदर्शनस्य दुष्टत्वात् ।

यद्धेतुत्वं सुदृढं तद्ब्रह्म श्रीनिवासनाम भजे ।।55 ।।

क्षणिकपरमाणुवादे परमाणूनां प्रतिक्षणं ध्वंसात् ।

तैः समुदायासिद्धेः तदसिद्धौ देहसिद्धिविरहाच्च ।। 56 ।।

।जगदारंभासिद्ध्या दुःस्थत्वात् बौद्धदर्शनस्यापि ।

यद्धेतुत्वं सुदृढं तद्ब्रह्म श्रीनिवासनाम भजे ।। 57 ।।

ज्ञानविषयाश्रयाणां उपलंभे सदृशि बाधविरहे च ।

विषयाश्रयौ निरस्य ज्ञानस्यैकस्य पारमार्थोक्त्या ।। 58 ।।

योगाचारमतस्याप्यतिदौःस्थ्येनाप्रमाणत्वात् ।

यद्धेतुत्वं सुदृढं तद्ब्रह्म श्रीनिवासनाम भजे ।।59।।

स्वस्मिन् प्रमाणसत्वेऽसत्वे वा शून्यवादस्य ।

उन्मज्जनविरहेण स्वासिद्ध्यापादकत्वेन ।। 60 ।।

।अत्यन्तं दुःस्थतया माध्यमिकस्य पक्षस्य ।

यद्धेतुत्वं सुदृढं तद्ब्रह्म श्रीनिवासनाम भजे ।। 61 ।।

51 2 2 6

तेजोऽन्धकारयोरिव परस्परविरुद्धयोरुभयोः ।

सर्वस्मिन्नपि वस्तुनि सत्वासत्वादिधर्मयोः कथनात् ।। 62 ।।

अत्यन्तं दुःस्थतया जैनाभिमतस्य पक्षस्य ।

यद्धेतुत्वं सुदृढं तद्ब्रह्म श्रीनिवासनाम भजे ।। 63 ।।

52 2 2 7

पशुपतिरशेषजगतः कर्तोपादानकारणं त्रिगुणम् ।

अनुमानगम्य ईश्वर इति वेदविरुद्धकल्पनात् बहुधा ।।64 ।।

करणं यथाऽधितिष्ठति जीवः प्रकृतिं तथैवेशः ।

अधितिष्ठतीत्युपगमे सुखदुःखादेः प्रसङ्गाच्च ।। 65 ।।

पाशुपतस्य मतस्याप्यतिदुःस्थत्वात् श्रुतिप्रमितम् ।

यद्धेतुत्वं सुदृढं तद्ब्रह्म श्रीनिवासनाम भजे ।। 66 ।।

53 2 2 8

व्यूहविशेषपरत्वात् जीवोत्पत्त्यादिवादिवचनस्य ।

वेदविरोधाभावात् कुत्रापि च पाञ्चरात्रतन्त्रस्य ।। 67 ।।

अप्रामाण्याभावात् प्रमाणमूर्धन्यतन्त्रसिद्धतया ।

यद्धेतुत्वं सुदृढं तद्ब्रह्म श्रीनिवासनाम भजे ।। 68 ।।

।54 2 3 1

ज्ञाते ब्रह्मणि सर्वं ज्ञातं भवतीति या प्रतिज्ञोक्ता ।

उत्पत्त्यनभ्युपगमे तदनिर्वाहान्निषेधविरहाच्च ।। 69 ।।

स्वीकर्तव्योत्पत्तिः ब्रह्मत एवेति निश्चयात् वियतः ।

यत्कार्यत्वमभग्नं तद्ब्रह्म श्रीनिवासनाम भजे ।। 70 ।।

55 2 3 2

स्वस्य बहुत्वोत्पत्ती संकल्प्य समस्तमसृजदिति सिद्ध्या ।

ब्रह्मैव वायुरूपात्तस्मादजनिष्ट वह्निरूपमिति ।। 71 ।।

अर्थावगतेः सिद्धा श्रुत्यन्तरतश्च सर्वस्य ।

यत उत्पत्तिः साक्षात् तद्ब्रह्म श्रीनिवासनाम भजे ।। 72 ।।

56 2 3 3

उत्पत्तिप्रतिषेधात् नित्यत्वोक्तेश्च जीवस्य ।

नास्त्युत्पत्तिरथापि प्रतिज्ञया प्रागुदाहृतया ।। 73 ।।

संकोचादिविकारि ज्ञानाख्यगुणप्रणाडिकया ।

यत्कार्यत्वमभग्नं तद्ब्रह्म श्रीनिवासनाम भजे ।।74 ।।

57 2 . 3 .4

न ज्ञानमात्रमात्मा नापि च विज्ञातृतैकरूपो वा ।

ज्ञानस्वरूपतायाः श्रुतिभिर्विज्ञातृतायाश्च ।। 75 ।।

तस्य बहुशोऽभिधानादुक्तज्ञानप्रणाडिकया ।

यत्कार्यत्वमभग्नं तद्ब्रह्म श्रीनिवासनाम भजे ।। 76।।

58 2. 3. 5

यच्चोदितेषु कर्मस्वात्मा कर्ता तदाऽस्य च विधेश्च ।

फलवत्तायाः सिद्धेः तद्ब्रह्म श्रीनिवासनाम भजे ।। 77 ।।

59 2. 3. 6

लौकिकवैदिककर्मसु कर्तृत्वं प्रत्यगात्मनो यत्तत् ।

यदधीनमाह निगमः तद्ब्रह्म श्रीनिवासनाम भजे ।। 78 ।।

60 2. 3. 7

गोत्वादिरिव गवादेरादित्यादेः प्रभादिरिव ।

यस्यांशोऽसौ जीवः तद्ब्रह्म श्रीनिवासनाम भजे।। 79 ।।

61-65 2. 4. 1 - 2. 4. 5

जीवोपकारकतया तत्करणानामणूनां च ।

एकादशेन्द्रियाणां प्राणस्य च वायुतोऽन्यस्य ।। 80 ।।

करणस्याणोर्यस्मादुत्पत्तेः श्रूयमाणतया ।

यत्कार्यत्वमभग्नं तद्ब्रह्म श्रीनिवासनाम भजे ।।81 ।।

66 2. 4. 6

अग्न्यादिदेवतानां जीवानां चेन्द्रियाद्यधिष्ठानम् ।

यत्सङ्कल्पायत्तं तद्ब्रह्म श्रीनिवासनाम भजे ।। 82 ।।

67 2. 4. 7

मनसा सहेन्द्रियत्वं वागादीनां च चक्षुरादीनाम् ।

गीतासु येन गीतं तद्ब्रह्म श्रीनिवासनाम भजे ।। 83 ।।

68 2. 4. 8

तेजोजलपृथिवीनामण्डादिव्यष्टिसृष्ट्यर्थम् ।

अन्योन्यं यन्मिश्रीकरणं तत्कर्तृकर्तृकत्वेन ।। 84 ।।

देवादिनामरूपव्याकरणं व्याहरन्निगमः ।

यत्कार्यं तत् कथयति तद्ब्रह्म श्रीनिवासनाम भजे ।। 85 ।।

69 3. 1. 1

पञ्चाग्निविषयविद्या संसृतिबन्धोत्थखेदविवृतिपरा ।

इष्टापूर्तादिकृतो देहाद्देहान्तरप्राप्तौ ।। 86 ।।

गतिमाह भूतसूक्ष्मैस्संपरिरब्धस्य सेन्द्रियप्राणैः ।

यत्सङ्कल्पायत्तां तद्ब्रह्म श्रीनिवासनाम भजे ।।87।।

70 3. 1. 2

सुकृतफले भुक्ते सत्यभुक्तफलकर्मभिस्सहितः ।

यस्येच्छयाऽवरोहति तद्ब्रह्म श्रीनिवासनाम भजे ।। 88 ।।

71 3. 1. 3

विद्याकर्मविहीनाः पापकृतो यस्य संकल्पात् ।

नरकानेव भजन्ते तद्ब्रह्म श्रीनिवासनाम भजे ।।89 ।।

72,73 3. 1. 4, 3. 1. 5

अवरोहन्गगनाद्यैस्संश्लेषं कमपि यत्कृतं प्राप्य ।

निष्क्रामत्यनतिचिरात् तद्ब्रह्म श्रीनिवासनाम भजे ।। 90 ।।

मेघान्निष्क्रान्तस्सन्, व्रीहिभिरन्यस्य देहतां प्राप्तैः।

श्लिष्यति यत्संकल्पात् तद्ब्रह्म श्रीनिवासनाम भजे ।। 91 ।।

74 3. 2. 1

रथवेशन्तप्रभृतीन्यत्याश्चर्याणि देहिनां स्वप्ने ।

सृजति यदचिन्त्यशक्त्या तद्ब्रह्म श्रीनिवासनाम भजे ।। 92 ।।

75 3. 2. 2

आयस्तोऽयं जीवः करणैस्सह तूलतल्प इव ।

शेते यत्र सुषुप्तौ तद्ब्रह्म श्रीनिवासनाम भजे ।। 93 ।।

76 3. 2. 3

यत्र शयनेन जीवस्स्वास्थ्यं समवाप्य भूयोऽपि ।

उत्तिष्ठति तल्पादिव तद्ब्रह्म श्रीनिवासनाम भजे ।। 94 ।।

77 3. 2. 4

यत्कारितासु जाग्रत्स्वप्नसुषुप्त्याद्यवस्थासु ।

मूर्छान्याभ्यो भिन्ना तद्ब्रह्म श्रीनिवासनाम भजे ।। 95 ।।

78 3. 2. 5

यत्संबन्धाज्जीवे जायन्ते जाग्रदादयो दोषाः ।

तेन शरीरेण समं सत्यपि योगे न ते दोषाः ।। 96 ।।

यस्मिन्संबध्यन्ते हेयानां प्रतिभटस्वभावतया ।

कल्याणगुणतयापि च तद्ब्रह्म श्रीनिवासनाम भजे ।। 97 ।।

79 3. 2. 6

यस्यांशभूतमेतन्मूर्तामूर्तात्मकं विश्वम् ।

भास्वत इव प्रकाशस्तद्ब्रह्म श्रीनिवासनाम भजे ।। 98 ।।

80 3. 2. 7

सर्वस्मात्परमं यत् यस्मात्परमं न किञ्चिदप्यस्ति ।

गुणतः स्वरूपतो वा तद्ब्रह्म श्रीनिवासनाम भजे ।। 99 ।।

81 3. 2. 8

कर्मभिरुपासनैश्चाशेषैराराधितं प्रसन्नं यत् ।

सकलफलप्रदमेकं तद्ब्रह्म श्रीनिवासनाम भजे ।। 100 ।।

82 3. 3. 1

वैश्वानरदहराद्या यद्विद्याश्चोदनाद्यभेदेन ।

शाखाद्वयेऽप्यभिन्नाः तद्ब्रह्म श्रीनिवासनाम भजे ।। 101 ।।

83 3. 3. 2

यदुपासनोपकृतये त्वाम्नाते प्राणदृष्टिरूपे ये ।

उद्गीथोपास्ती द्वे उद्गातरि प्राणदृष्टिरेकस्याम् ।। 102 ।।

उद्गीथाङ्गे प्रणवे त्वितरस्यामिति च रूपभेदेन ।

विद्ये ते भिद्येते तद्ब्रह्म श्रीनिवासनाम भजे ।। 103 ।।

84 3. 3. 3

कौषीतक्युक्तायां यदधीनप्राणविषयविद्यायाम् ।

छान्दोग्योक्तायां च श्रैष्ठ्यवतः प्राणरूपवेद्यस्य ।। 104 ।।

श्रैष्ठ्योपपादनस्य च सर्वस्याप्येकरूपतया ।

विद्ये उभे अभिन्ने तद्ब्रह्म श्रीनिवासनाम भजे ।। 105 ।।

85 3. 3. 4

परविद्यास्वखिलास्वपि चिदचिद्व्यावर्तकैर्विशिष्टं यत् ।

सत्यत्वाद्यैर्ध्येयं तद्ब्रह्म श्रीनिवासनाम भजे ।। 106 ।।

86 3. 3..5

वाजसनेये साम्नि च यदधीनप्राणविषयविद्यायाम् ।

प्राणोपासननिष्ठैः पूर्वं परतश्च भुक्तीनाम् ।।107 ।।

आचमने विनियुक्तास्वप्स्वेव प्राणवासस्त्वम् ।

अनुसन्धेयं विहितं तद्ब्रह्म श्रीनिवासनाम भजे ।। 108 ।।

87 3. 3 .6

उपनिषदि वाजिनां द्विः श्रुताऽपि शाण्डिल्यविद्यैका ।

एकत्र यस्य कथयन्त्यमोघसङ्कल्पताख्यगुणम् ।। 109 ।।

तस्यैव विततिभेदान् सर्ववशित्वप्रशासितृत्वाद्यान् ।

अन्यत्र प्राह गुणांस्तद्ब्रह्म श्रीनिवासनाम भजे ।। 110 ।।

88 3. 3. 7

आदित्यमण्डलस्थं त्वहरिति नाम्ना यदक्षिनिष्ठं तु ।

अहमिति नाम्नोपास्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 111 ।।

89 3. 3. 8

यद्द्युव्याप्त्यादिगुणा अल्पायतनान्यविषयविद्यासु ।

व्यवतिष्ठन्ते ध्येयास्तद्ब्रह्म श्रीनिवासनाम भजे ।। 112 ।।

90 3. 3. 9

ब्रह्मप्राप्तिफलैका नान्याऽतः पुरुषविद्ययोर्भेदः ।

यत्प्राप्त्यप्राप्तिभ्यां तद्ब्रह्म श्रीनिवासनाम भजे ।। 113 ।।

91 3. 3. 10

यदुपासनाविधायकवेदाध्ययने भवन्ति विनियुक्ताः ।

मन्त्राश्शं नो मुख्यास्तद्ब्रह्म श्रीनिवासनाम भजे ।। 114 ।।

92 3. 3. 11

यद्विद्याफलभूतौ यौ यन्निष्ठस्य सुकृतदुष्कृतयोः ।

निश्शेषतया हानिस्तन्मित्रामित्रयोः प्रवेशश्च ।।115 ।।

द्वावेतयोद्र्वयोरपि चिन्तनमखिलासु विद्यासु ।

यच्चिन्तनवत्कार्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 116 ।।

93 3. 3. 12

यद्विद्याफलभूतो विदुषोऽखिलपुण्यपापविश्लेषः ।

देहान्निर्गमकाले तद्ब्रह्म श्रीनिवासनाम भजे ।। 117 ।।

94 3. 3. 13

ये चेमेऽरण्य इति श्रुतिरियमाहार्चिरादिगतिम् ।

अखिलयदुपासकानां तद्ब्रह्म श्रीनिवासनाम भजे ।। 118 ।।

95 3. 3. 14

हेयप्रतिभटतात्मकममलत्वं यस्य सर्वविद्यासु ।

उपसंहार्यं रूपं तद्ब्रह्म श्रीनिवासनाम भजे ।। 119 ।।

96 3. 3. 15

उषस्तिकहोलप्रश्नप्रत्युक्त्योर्भेददर्शनेऽपि तयोः ।

सर्वान्तरत्वमेकं प्रष्टृप्रतिवक्त्रभिप्रेतम् ।। 120 ।।

इतरद्व्यावृत्त्यर्थमिति प्रतीतेर्विवक्षिता तत्र ।

यद्विषया विद्यैका तद्ब्रह्म श्रीनिवासनाम भजे ।। 121 ।।

97 3. 3. 16

वाजसनेये साम्नि च यद्विषये दहरविद्ये ये ।

सेतुत्वविधारणाद्यैः सैवेयमिति प्रतीयमानतया ।। 122 ।।

"सर्वश्य वशी " त्याद्यैर्गुणाष्टकस्यात्र वेद्यतावगतम् ।

भिद्येते न मिथस्ते तद्ब्रह्म श्रीनिवासनाम भजे ।। 123 ।।

98 3. 3. 17

उद्गीथवेदनस्याभावेपि क्रत्वनुष्ठितैः श्रवणात् ।

तद्वेदनस्य नियमाभावस्य क्रतुषु लाभेन ।। 124 ।।

तद्वेदनसहिता वा रहिता वा तेऽखिलाः क्रतवः ।

यदुपासनाङ्गभूतास्तद्ब्रह्म श्रीनिवासनाम भजे ।। 125 ।।

99 3. 3. 18

दहरोपासननिष्ठैर्गुणवैशिष्ट्यस्वरूपाभ्याम् ।

यत्पृथगनुसन्धेयं तद्ब्रह्म श्रीनिवासनाम भजे ।। 126 ।।

100 3. 3. 19

नारायणानुवाके तत्तद्विद्यासु शिवपदाद्युक्तम् ।

यदिति निरणायि वाक्यैस्तद्ब्रह्म श्रीनिवासनाम भजे ।। 127 ।।

101 3. 3. 20

वाक्चिन्मनश्चिदाद्याश्चीयन्ते यत्कृते क्रतोस्तस्य ।

भवति हि यदेव फलदं तद्ब्रह्म श्रीनिवासनाम भजे ।। 128 ।।

102 3. 3. 21

परविद्यासूपास्यो जीवात्मा यद्विशेषणत्वेन ।

शुद्धाकार उपास्यः तद्ब्रह्म श्रीनिवासनाम भजे ।। 129 ।।

103 3. 3. 22

सर्वासां व्यक्तीनां उद्गीथपदेन धीस्थत्वात् ।

तत्तद्व्यक्तिविशेषैः सर्वैः संबद्ध्यमानानि ।। 130 ।।

तदुपासनानि तद्वत् संबद्ध्यन्तेऽखिलासु शाखासु ।

यद्यजनरूपकर्मसु तद्ब्रह्म श्रीनिवासनाम भजे ।। 131 ।।

104 3. 3. 23

वैश्वानरविद्यायां त्रैलोक्यशरीरमेव यदुपास्यम् ।

न त्वेकैकावयवं तद्ब्रह्म श्रीनिवासनाम भजे ।। 132 ।।

105 3. 3. 24

गुणचोदनादिभेदादानन्दमयादयो विद्याः ।

यद्विषया भिद्यन्ते तद्ब्रह्म श्रीनिवासनाम भजे ।। 133 ।।

106 3. 3. 25

एकफलसाधनत्वात् यद्विद्यानां समस्तानाम् ।

निर्णीयते विकल्पस्तद्ब्रह्म श्रीनिवासनाम भजे ।। 134 ।।

107 3. 3. 26

पुरूषार्थत्वावगतेर्नोद्गीथोपासनस्य नियमोऽस्ति ।

यद्यजनरूपकर्मसु तद्ब्रह्म श्रीनिवासनाम भजे ।। 135 ।।

108 3. 4. 1

तत्तत्कर्मोपकृतात् यदुपासनतः फलावाप्तिः ।

श्रुतिवाक्येभ्यस्सिद्धः तद्ब्रह्म श्रीनिवासनाम भजे ।। 136।।

109 3. 4. 2

यद्यजनरूपकर्मण्युद्गीथो रसतमत्वेन ।

श्रुत्योपास्यो विहितस्तद्ब्रह्म श्रीनिवासनाम भजे ।। 137 ।।

110 3. 4. 3

सद्विद्याद्यारंभेष्वाख्यानैः श्वेतकेतुमुख्यानाम् ।

यद्विद्याः स्तूयन्ते तद्ब्रह्म श्रीनिवासनाम भजे ।। 138 ।।

111 3. 4. 4

यज्ञाद्यनधिकृता ये त्वाश्रमिणस्तेषु यद्विद्या ।

नाकाङ्क्षति यज्ञादींस्तद्ब्रह्म श्रीनिवासनाम भजे ।। 139 ।।

112 3. 4. 5

यज्ञाधिकारवत्सु त्वग्न्याधानादिकान् सर्वान् ।

आकाङ्क्षति यद्विद्या तद्ब्रह्म श्रीनिवासनाम भजे ।। 140 ।।

113 3. 4. 6

यज्ञाधिकारवत्स्वपि यद्विद्या शमदमादिसापेक्षा ।

अङ्गतया विहितत्वात् तद्ब्रह्म श्रीनिवासनाम भजे ।। 141 ।।

114 3. 4. 7

प्राणविदोऽप्यतिशक्तेर्यन्निष्ठस्याऽपि भोजनानियमः ।

अत्यन्तापद्विषयस्तद्ब्रह्म श्रीनिवासनाम भजे ।। 142 ।।

115 3. 4. 8

यदुपासनाङ्गभूतं यज्ञादिकमङ्गमाश्रमस्यापि ।

भवति विनियोगभेदात् तद्ब्रह्म श्रीनिवासनाम भजे ।। 143 ।।

116 3. 4. 9

स्वार्हैर्दानजपाद्यैरपि सिद्धेस्संभवाद्विधुरः ।

यदुपास्तावधिकुरुते तद्ब्रह्म श्रीनिवासनाम भजे ।। 144 ।।

117 3. 4. 10

आरूढाः पतिता ये संन्यासाद्याश्रमात् तेषाम् ।

नाधिकृतिर्यदुपास्तौ तद्ब्रह्म श्रीनिवासनाम भजे ।। 145 ।।

118 3. 4. 11

यद्विद्यासहकारिक्रत्वङ्गोद्गीथवेदनाः सर्वाः ।

ऋत्विग्भिः कर्तव्यास्तद्ब्रह्म श्रीनिवासनाम भजे ।। 146 ।।

119 3. 4. 12

यस्य शुभाश्रयमननं शमादिवत् यस्य चिन्तायाः ।

सहकारितया विहितं तद्ब्रह्म श्रीनिवासनाम भजे ।। 147 ।।

120 3. 4. 13

यद्विद्यानिष्ठस्य प्रकृष्टमाहात्म्यशालिनो विहितम् ।

महिमानाविष्करणं तद्ब्रह्म श्रीनिवासनाम भजे ।। 148 ।।

121 3. 4. 14

न नियतिरैश्वर्यफला यद्विद्योत्पद्यते तदैवेति ।

धर्मेष्वनुष्ठितेष्वपि तद्ब्रह्म श्रीनिवासनाम भजे ।। 149 ।।

130 3. 4. 15

यद्विद्या प्रबलतमाप्यसति प्रतिबन्धके प्रबले ।

उत्पद्यते तदानीं तद्ब्रह्म श्रीनिवासनाम भजे ।। 150 ।।

131 4. 1. 1

अपवर्गसाधनं यद्वेदनमावर्तनीयमसकृदिति ।

श्रुत्यैककण्ठ्यसिद्धं तद्ब्रह्म श्रीनिवासनाम भजे ।। 151 ।।

132 4. 1. 2

परजीवयोरुपास्योपासकयोस्स्वरूपभेदेऽपि ।

तादात्म्यस्य विधानाच्छ्øतिभिर्देहात्मभावस्य ।। 152 ।।

आत्मेत्युपास्यताया विहितत्वादप्युपासित्रा ।

आत्मेति तु यदुपास्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 153 ।।

133 4. 1. 3

यद्दृष्ट्योपास्यानां नामादीनामनात्मत्वात् ।

आत्मत्वं नोपास्यं तद्ब्रह्म श्रीनिवासनाम भजे ।। 154 ।।

134 4. 1. 4

यदुपासनसहकारिक्रत्वङ्गोद्गीथ एव तु निकृष्टे ।

आदित्यदृष्टिरुचिता तद्ब्रह्म श्रीनिवासनाम भजे ।। 155 ।।

135 4. 1. 5

यदुपासनमपि नियमादासीनेनैव कर्तव्यम् ।

ऐकाग्र्यसिद्धिहेतोः तद्ब्रह्म श्रीनिवासनाम भजे ।। 156 ।।

136 4. 1. 6

यावज्जीवं कार्यं यदुपासनमन्वहं ध्यात्रा ।

श्रुतिषु तथैव विधानात् तद्ब्रह्म श्रीनिवासनाम भजे ।। 157 ।।

137 4. 1. 7

अभ्यासाद्यदुपास्तेर्दर्शनसमरूपतासिद्धौ ।

तत्पूर्वविरचितानां निश्शेषं भवति पाप्मनां नाशः ।। 158 ।।

उत्तरकालकृतानां प्रामादिकपाप्मनामसंश्लेषः ।

यद्विद्यामाहात्म्यात् तद्ब्रह्म श्रीनिवासनाम भजे ।। 159 ।।

138 4. 1. 8

यद्विद्ययैव भवतः पूर्वोत्तरसुकृतसंक्षयाश्लेषौ ।

अश्लेषो देहान्ते तद्ब्रह्म श्रीनिवासनाम भजे ।। 160 ।।

139 4. 1. 9

पूर्वकृतयोद्वयोरपि फलदानायाप्रवृत्तयोरेव ।

यद्विद्यया विनाशस्तद्ब्रह्म श्रीनिवासनाम भजे ।। 161 ।।

140 4. 1 . 10

सर्वेऽप्याश्रमधर्मा अनिच्छता चापि तत्फलं विदुषा ।

यद्विद्यार्थं कार्यास्तद्ब्रह्म श्रीनिवासनाम भजे ।। 162 ।।

141 4. 1. 11

यदुपासकस्य पुंसः फलदानाय प्रवृत्तकर्माणि ।

नाश्यानि तदुपभोगात् तद्ब्रह्म श्रीनिवासनाम भजे ।। 163 ।।

142 4. 2. 1

सर्वेन्द्रियाणि जन्तोर्मरणदशायां यदीयसङ्कल्पात् ।

संयुज्यन्ते मनसा तद्ब्रह्म श्रीनिवासनाम भजे ।। 164 ।।

143 4. 2. 2

सर्वेन्द्रियसंयुक्तं मनस्तु सङ्कल्पतो यस्य ।

प्राणेन भवति युक्तं तद्ब्रह्म श्रीनिवासनाम भजे ।। 165 ।।

144 4. 2. 3

करणसहितेन मनसा युक्तः प्राणस्तु पुरुषेण ।

यत्सङ्कल्पात् श्लिष्यति तद्ब्रह्म श्रीनिवासनाम भजे ।। 166 ।।

145 4. 2. 4

प्राणः पुरुषेण युतो भूतैस्सह यस्य सङ्कल्पात् ।

संसृष्टो भवति तदा तद्ब्रह्म श्रीनिवासनाम भजे ।। 167 ।।

146 4. 2. 5

यदुपासननिष्ठानामितरेषां चेयमुत्क्रान्तिः ।

यस्येच्छया समाना तद्ब्रह्म श्रीनिवासनाम भजे ।। 168 ।।

147 4. 2. 6

करणमनःप्राणैस्सह जीवेन च भूतसूक्ष्माणि ।

संपद्यन्ते यस्मिन् तद्ब्रह्म श्रीनिवासनाम भजे ।। 169 ।।

148 4. 2. 7

यस्मिन् मरणदशायां संपत्तिर्भूमसूक्ष्मजीवानाम् ।

सङ्गतिविशेषरूपा तद्ब्रह्म श्रीनिवासनाम भजे ।। 170 ।।

149 4. 2. 8

यदनुग्रहतो विद्वान् नाड्या मूर्धन्यया शताधिकया ।

निर्गच्छति स्वदेहात् तद्ब्रह्म श्रीनिवासनाम भजे ।। 171 ।।

150 4. 2. 9

आदित्यस्य स रश्मीन् अनुसृत्यैव प्रतिष्ठते देहात् ।

यदुनुग्रहेण विद्वान् तद्ब्रह्म श्रीनिवासनाम भजे ।। 172 ।।

151 4. 2. 10

यदुपासको निशायां म्रियमाणोऽप्यखिलकर्मणां नाशात् ।

यत्प्राप्नोत्यविलंबात् तद्ब्रह्म श्रीनिवासनाम भजे ।। 173 ।।

152 4. 2. 11

यद्विद्यामनुतिष्ठन् म्रियमाणो दक्षिणेऽप्ययने ।

ब्रह्म प्राप्नोति परं तद्ब्रह्म श्रीनिवासनाम भजे ।। 174 ।।

153 4. 3. 1

तदुपासीनस्सर्वोऽप्येकेनैवार्चिरादिमार्गेण ।

प्राप्नोति यस्य लोकान् तद्ब्रह्म श्रीनिवासनाम भजे ।। 175 ।।

154 4. 3. 2

यदुपासकोऽर्चिरादौ मार्गे संवत्सरं प्राप्य ।

पश्चाद्गच्छति वायुं तद्ब्रह्म श्रीनिवासनाम भजे ।। 176 ।।

155 4. 3. 3

यदुपासकोऽर्चिरादौ तटितं प्राप्याथ वरुणमाप्नोति ।

इन्द्रमथ ब्रह्माणं तद्ब्रह्म श्रीनिवासनाम भजे ।। 177 ।।

156 4. 3. 4

यदुपासननिष्ठानां अतिवहनेष्वर्चिरादयः पुरुषाः ।

येन नियुक्ता मार्गे तद्ब्रह्म श्रीनिवासनाम भजे ।। 178 ।।

157 4. 3. 5

पञ्चाग्निविदः पुरुषात् ब्रह्मविदश्चातिवाहिकगणः सः ।

अतिवहति यन्नियुक्तः तद्ब्रह्म श्रीनिवासनाम भजे ।। 179 ।।

158 4. 4. 1

कर्मतिरोहितरूपो भवत्ययं यदुपसंपत्त्या ।

आविर्भवत्स्वरूपः तद्ब्रह्म श्रीनिवासनाम भजे ।। 180 ।।

159 4. 4. 2

बन्धककर्मविमुक्तः पुरुषोऽयं यद्विशेषणत्वेन ।

अनुभवति स्वात्मानं तद्ब्रह्म श्रीनिवासनाम भजे ।। 181 ।।

160 4. 4. 3

अपहतपाप्मत्वाद्यैः आविर्भवति स्वयंप्रकाशोऽयम् ।

यत्संपत्त्या जीवः तद्ब्रह्म श्रीनिवासनाम भजे ।। 182 ।।

161 4. 4. 4

यत्परिचरणासक्तो मुक्तः सङ्कल्पमात्रेण ।

प्राप्नोति कामितार्थान् तद्ब्रह्म श्रीनिवासनाम भजे ।। 183 ।।

162 4. 4. 5

सतनुः कदाचिदतनुः भूत्वा मुक्तो यथाकामम् ।

अनुभवति यस्य लीलां तद्ब्रह्म श्रीनिवासनाम भजे ।। 184 ।।

163 4. 4. 6

मुक्तः स भोगमात्रे परमं साम्यं प्रयाति येन समम् ।

विच्छेदकथारहितं तद्ब्रह्म श्रीनिवासनाम भजे ।। 185 ।।

अधिकरणरत्नमाला ग्रथिता श्रीदेशिकार्येण ।

उल्लासमावहन्ती जयतु श्रीश्रीनिवासहृदयेऽसौ ।।

---